# shrI Hanumad Vadavanala Stotram

# શ્રીહનુમદ્વડવાનલસ્તોત્રમ્

## Document Information

Text title : Hanumad Vadavanala Stotram

File name : hanumadvaDavAnala.itx

Category : hanumaana, stotra

Location : doc_hanumaana

Author : vibhIShaNa

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com, Ruma Dewan

Latest update : April 05, 2006, February 21, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 22, 2023

*sanskritdocuments.org*

# shrI Hanumad Vadavanala Stotram

# શ્રીહનુમદ્વડવાનલસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
ૐ અસ્ય શ્રીહનુમદ્વડવાનલસ્તોત્રમન્ત્રસ્ય
શ્રીરામચન્દ્ર ઋષિઃ, શ્રીવડવાનલહનુમાન્ દેવતા,
(શ્રીહનુમાન્ વડવાનલ દેવતા)
હ્રાં બીજં, હ્રીં શક્તિઃ, સૌં કીલકં, મમ સમસ્તવિઘ્નદોષનિવારણાર્થે,
સર્વશત્રુક્ષયાર્થે, સકલરાજકુલસંમોહનાર્થે,
મમ સમસ્તરોગપ્રશમનાર્થે, આયુરારોગ્યૈશ્વર્યાભિવૃદ્ધ્યર્થે,
સમસ્તપાપક્ષયાર્થે, શ્રીસીતારામચન્દ્રપ્રીત્યર્થે
હનુમદ્વડવાનલસ્તોત્રજપે વિનિયોગઃ (સઙ્કુલ્પઃ) ॥

અથ ધ્યાનમ્ ।
મનોજવં મારુતતુલ્યવેગં જિતેન્દ્રિયં બુદ્ધિમતાં વરિષ્ઠમ્ ।
વાતાત્મજં વાનરયૂથમુખ્યં શ્રીરામદૂતં શરણં પ્રપદ્યે ॥

ૐ હ્રાં હ્રીં ૐ નમો ભગવતે શ્રી મહાહનુમતે પ્રકટપરાક્રમ
સકલદિઙ્મણ્ડલયશોવિતાનધવલીકૃતજગત્રિતય વજ્રદેહ
રુદ્રાવતાર લઙ્કાપુરીદહન ઉમા-અમલ-મન્ત્ર (ઉમા-અર્ગલ-મન્ત્ર)
ઉદધિબન્ધન દશશિરઃકૃતાન્તક સીતાશ્વસન વાયુપુત્ર
અઞ્જનીગર્ભસમ્ભૂત શ્રીરામલક્ષ્મણાનન્દકર કપિસૈન્યપ્રાકાર
સુગ્રીવસાહ્યરણ પર્વતોત્પાટન કુમારબ્રહ્મચારિન્ ગભીરનાદ
સર્વપાપગ્રહવારણ સર્વજ્વરોચ્ચાટન ડાકિનીવિધ્વંસન
ૐ હ્રાં હ્રીં ૐ નમો ભગવતે મહાવીરવીરાય સર્વદુઃખનિવારણાય
ગ્રહમણ્ડલસર્વભૂતમણ્ડલસર્વપિશાચમણ્ડલોચ્ચાટન
ભૂતજ્વરએકાહિકજ્વરદ્વ્યાહિકજ્વરત્ર્યાહિકજ્વરચાતુર્થિકજ્વર-
સન્તાપજ્વરવિષમજ્વરતાપજ્વરમાહેશ્વરવૈષ્ણવજ્વરાન્ છિન્ધિ છિન્ધિ
યક્ષબ્રહ્મરાક્ષસભૂતપ્રેતપિશાચાન્ ઉચ્ચાટય ઉચ્ચાટય (સ્વાહા) ।

ૐ હ્રાં હ્રીં ૐ નમો ભગવતે શ્રીમહાહનુમતે
ૐ હ્રાં હ્રીં હ્રૂં હ્રૈં હ્રૌં હ્રઃ આં હાં હાં હાં હાં ૐ સૌં એહિ એહિ એહિ
ૐ હં ૐ હં ૐ હં ૐ હં ૐ નમો ભગવતે શ્રીમહાહનુમતે
શ્રવણચક્ષુર્ભૂતાનાં શાકિનીડાકિનીનાં વિષમદુષ્ટાનાં
સર્વવિષં હર હર આકાશભુવનં ભેદય ભેદય
છેદય છેદય મારય મારય શોષય શોષય મોહય મોહય
જ્વાલય જ્વાલય પ્રહારય પ્રહારય સકલમાયાં ભેદય ભેદય (સ્વાહા) ।

ૐ હ્રાં હ્રીં ૐ નમો ભગવતે મહાહનુમતે સર્વગ્રહોચ્ચાટન
પરબલં ક્ષોભય ક્ષોભય સકલબન્ધનમોક્ષણં કુરુ કુરુ
શિરઃશૂલગુલ્મશૂલસર્વશૂલાન્નિર્મૂલય નિર્મૂલય
નાગપાશાનન્તવાસુકિતક્ષકકર્કોટકકાલિયાન્
યક્ષકુલજલગતબિલગતરાત્રિઞ્ચરદિવાચર સર્વાન્નિર્વિષં
(યક્ષકુલજગત્ રાત્રિઞ્ચર દિવાચર સર્પાન્નિર્વિષં)
કુરુ કુરુ સ્વાહા ॥

રાજભયચોરભયપરમન્ત્રપરયન્ત્રપરતન્ત્રપરવિદ્યાશ્છેદય છેદય
સ્વમન્ત્રસ્વયન્ત્રસ્વતન્ત્રસ્વવિદ્યાઃ પ્રકટય પ્રકટય
સર્વારિષ્ટાન્નાશય નાશય સર્વશત્રૂન્નાશય નાશય
અસાધ્યં સાધય સાધય હું ફટ્ સ્વાહા ॥

॥ ઇતિ શ્રીવિભીષણકૃતં હનુમદ્બડવાનલસ્તોત્રં સમ્પૂર્ણમ્ ॥

As the stotra itself says it is helpful
in the control of all illness and enhances
wealth. To be under a protective cover
I would suggest pa nchamukhI hanumatkavacham
and ekAdashamukhIhanumatkavacham which are
also on the Sanskrit Documents site.

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*shrI Hanumad Vadavanala Stotram*

pdf was typeset on February 22, 2023

Please send corrections to *sanskrit@cheerful.com*